# RAMAKRISHNA MISSION VIDYAMANDIRA

(Residential Autonomous College under University of Calcutta)

**M.A./M.SC. FOURTH SEMESTER EXAMINATION, MAY 2012**

**SECOND YEAR**

**SANSKRIT [Vyakarana]**

Date : 28/05/2012

Time : 11 am – 3 pm

Paper : VIII

Full Marks : 100

1. यथाभिमतं पद**चतुष्टयं** साध्यताम्। [4×2½]
   - क) आदित्यः
   - ख) पाञ्चकपालम्
   - ग) षाण्मातुरः
   - घ) राष्ट्रियः
   - ङ) विद्युत्वान्
   - च) राजन्वती

2. सूत्र**द्वयं** व्याख्यायताम्। [2×5]
   - क) समर्थानां प्रथमाद्वा
   - ख) गोत्रेऽलुगचि
   - ग) वृद्धिर्यस्याचामादिस्तद्वृद्धम्

3. कस्यचि**देकस्योत्तरं** विधेयम्। [1×10]
   - क) आत्मनेपदविधायकानि पञ्च सूत्राणि सोदाहरणमालोच्यन्ताम्।
   - ख) स्थाधातोरात्मनेपदत्वं कैः सूत्रैः सिध्यते, सोदाहरणं व्याख्यायताम्।

   **अथवा,**

   सूत्र**द्वयं** व्याख्यायताम्। [2×5]
   - क) अनुदात्तङित आत्मनेपदम्
   - ख) कर्तरि कर्मव्यतिहारे
   - ग) विभाषाऽकर्मकात्

4. **द्वयोः** पदयोः साधनप्रक्रिया प्रदर्शनीया। [2×2½]
   - क) अनुकरोति
   - ख) उत्तिष्ठते
   - ग) दिदृक्षते

5. **त्रितयस्य** साधुत्वमसाधुत्वं वा शरणदेवरीत्या प्रतिपाद्यताम्। [3×5]
   - क) तुन्दपरिमृजः
   - ख) दङ्क्ष्णवः पशवः
   - ग) गोऽभवत्
   - घ) त्वकत्पितृकः

6. श्लोक**द्वयस्य** धातुगणोल्लेखपुरःसरं व्याख्या कार्या। [2×7½]
   - क) धुनोति चम्पकवनानि धुनोत्यशोकं
     चूतं धुनाति धुवति स्फुटितातिमुक्तम्।

वायुर्विधूनयति चम्पकपुष्परेणून्
यत्कानने धवति चन्दनमञ्जरीश्च॥

ख) गोपायति क्षितिमिमां चतुरब्धिसीमां
पापाज्जुगुप्सत उदारमतिः सदैव।
वित्तं न गोपयति यस्तु वनीयकेभ्यो
धीरो न गुप्यति महत्यपि कार्यजाते॥

ग) ईर्ते यत् कीर्तिरैन्द्रं पुरमनवरतं प्रेरयत्यन्तरात्मा
यं धर्मे प्रेरति श्रीर्विषयरसास्वादनाय प्रकामम्।
यः प्रेणत्यात्मनोऽघं क्रतुभिरतनुभिः प्रेणयत्यस्त्रजालैः
संग्रामे शत्रुसेनां द्रविणवितरणैः प्रेणयत्यर्थिदौःस्थ्यम्॥

7. **एकस्यो**त्तरं प्रदेयम्। [1×10]

क) शूद्रा चामहत्पूर्वा जातिरिति वार्त्तिकं मनोरमादिशा व्याख्यात।

ख) 'प्रत्ययस्थात् कात्' इति सूत्रे प्रत्येकं पदानां ग्रहणस्य प्रयोजनं प्रतिपाद्य सूत्रमिदं व्याख्यायताम्।

8. **एकः** प्रश्न समाधेयः। [1×5]

क) अचेतने खट्वाशब्दे कथं टाप्सिद्धिः ?

ख) टिप्पनी लेख्या— जातिः।

9. **एकमा**धारीकृत्य निबन्धो विरच्यताम्। [1×20]

क) शाब्दिकनये शब्दब्रह्मस्वरूपम्

ख) महाभाष्यम्

ग) प्राक्पाणिनिव्याकरणपरम्परा।